# संस्कृत वार्ता:

दिनाङ्क : 11/07/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- भारत-न्यूजीलैण्डदेशयोः द्विपक्षीय-सम्बन्धाः सामरिक-सहभागिता-स्तरे समेधिता: । त्रिंशदधिकद्विसहस्रतमवर्षं यावत् पारस्परिक-व्यापारं द्विगुणीकृत्य पञ्चत्रिंशत्-सहस्र-कोटि रूप्यकाणां लक्ष्यं निर्धारितम्।
- प्रधानमन्त्रिणः नरेन्द्रमोदिनः कथनम्- न्यूजीलैण्डदेशे निवसता भारतीय-समुदायेन द्वयोः राष्ट्रयोः विकास-यात्रायाम् एकः महत्त्वपूर्णो भागः ऊढः, ऑकलैण्ड-नगरे विशालं भारतीय-प्रवासि-समुदायं च सम्बोधितवान् असौ।
- रक्षामन्त्रिणा राजनाथसिंहेन स्वदेशी-तन्त्रेण निर्मितस्य 'आईएनएस महेन्द्रगिरि' युद्धपोतस्य विधिवत् जलावतरणं विधापितम्, संसूचितं च यत् भारतं एकं सुदृढं, आत्मनिर्भरं, भविष्योन्मुखं च रक्षा-बलं निर्माति।
- परिवहन-क्षेत्रे प्रौद्योगिकी-नवोन्मेष-सञ्चालित-सहयोगं सुदृढं विधातुं ऐतिहासिकं 'ब्रिक्स-मन्त्री-घोषणापत्रं सर्वसम्मत्या अङ्गीकृतम्।
- बावी-चक्रवातस्य' कारणात् जपान-तैवानयोः विमानयात्राः निरस्तीकृताः, शैक्षणिकाः संस्थाः च स्थगिताः।
- भारत-इङ्ग्लैण्डदेशयोः मध्ये पञ्चम-अन्तिमा च टी-20 अन्ताराष्ट्रिय-क्रिकेटक्रीडा अद्य सायं साउथेम्पटन-नगरे आयोजिष्यते।
- फीफा विश्वचषक-पादकन्दुक-प्रतिस्पर्धा: अन्तिम-उपान्त्य-स्थानानां निश्चयार्थं अद्य रात्रौ प्रागुपान्त्य-चरणे नार्वे-इङ्ग्लैण्डदलयोः अथ अर्जेन्टिना-स्विट्जरलैण्डदलयोः मध्ये स्पर्धा भविता।

---------------------------------------------------

<u>प्रधानमन्त्री-न्यूज़ीलैण्डयात्रा</u>

प्रधानमन्त्री नरेन्द्रमोदी स्वस्य ऐतिहासिकीं द्विदिवसीयां न्यूजीलैण्डयात्रां सम्पाद्य अद्य भारताय प्रस्थितवान्। विगत-चतुर्दशकेभ्यः अपि अधिकसमयान्तराले कस्यचित् भारतीय-प्रधानमन्त्रिणः इयं प्रथमा न्यूज़ीलैण्ड-यात्रा आसीत्, या द्वयोः देशयोः पारस्परिक-सम्बन्धान् सुदृढीकर्तुं महत्त्वपूर्णां भूमिकां निर्व्यूढवती। तत्र तावत् अद्य प्रधानमन्त्री नरेन्द्रमोदी सहैव न्यूजीलैण्ड-देशस्य प्रधानमन्त्री क्रिस्टोफर लक्सन् इत्येतौ ऑकलैण्ड-नगरे द्विपाक्षिक-वार्तानन्तरं उभयोः देशयोः सम्बन्धान् सामरिक-सहयोगित्वेन रूपान्तरितवन्तौ। अनेनैव सह त्रिंशदधिक-द्विसहस्रतमवर्षं यावत् उभयदेशयोः वार्षिक-द्विपक्षीय-व्यापारं द्विगुणीकृत्य पञ्चत्रिंशत्सहस्र-कोटि-रूप्यकात्मकं विधातुं पञ्चवर्षीयं लक्ष्यं निर्धारितवन्तौ। शिष्टमण्डल-स्तरीय-मन्त्रणायां प्रधानमन्त्रिणा गदितं यत्, स्वकीयः अयं न्यूजीलैण्ड-प्रवासः द्विपाक्षिक-सम्बन्धेषु केनचन ऐतिहासिक- कीर्तिस्तम्भत्वेन सेत्स्यति। उभाभ्यां नेतृभ्यां प्रतिपादितं यत्, हिन्द-प्रशान्त-क्षेत्रे शान्तिं, स्थिरतां, सुरक्षां च सुदृढीकर्तुं भारत-न्यूजीलैण्ड-देशौ प्रमुखां भूमिकां निर्वोढुं शक्नुतः। उभयदेशयोः मध्ये सम्पन्नस्य मुक्त-व्यापार-सहभागित्वस्य प्रशंसा कुर्वता श्रीमोदिना न्यूजीलैण्ड-देशस्य क्षिप्र-प्रयासाः श्लाघिताः, सहैव तत्रत्य प्रधानमन्त्रिणः लक्सन्-वर्यस्य कुशल-नेतृत्वाय च धन्यवादः प्रकटितः।

अत्रावसरे न्यूजीलैण्ड-प्रधानमन्त्रिणा आधिकारिकरूपेण घोषितं यत्, इयं प्रस्ताविता सामरिक-सहभागिता प्रमुखाणां क्षेत्राणां विकासार्थं सहैव पारस्परिक-सहयोगस्य विस्ताराय च कञ्चन व्यापकं तन्त्रं प्रदास्यति।

---------------------------------------------------

<u>प्रधानमन्त्री-डायस्पोरा - HL-2</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य न्यूजीलैण्ड-देशस्य ऑकलैण्ड-नगरे आयोजिते एकस्मिन् प्रवासी-भारतीय-समुदायस्य कार्यक्रमे उद्घोषितवान् यत्, तत्रत्यः भारतीय-समुदायः भारत-न्यूजीलैण्ड-देशयोः वर्धमानायाः सहभागितायाः अत्यन्त-महत्त्वपूर्णः आधारस्तम्भः वर्तते।

ऑकलैण्डतः वेलिङ्गन-पर्यन्तं क्राइस्टचर्चतः क्वीन्सटाउन-पर्यन्तं न्यूजीलैण्डस्य प्रत्येकस्मिन् क्षेत्रे उष्यमाणः भारतीय-समुदायः एतस्याः संयुक्त-यात्रायाः एकः अभिन्नः भागः वर्तते । स्वसम्बोधने

प्रधानमन्त्रिणा प्रतिपादितं यत्, भारत-न्यूजीलैण्ड-सम्बन्धः स्मृतये, चिरस्थायिन्यै मैत्र्यै, समान-मूल्याय सहैव उज्ज्वल-भविष्याय च निर्मितः। अवसरेऽस्मिन् न्यूजीलैण्ड-प्रधानमन्त्रिणा क्रिस्टोफर लक्सन् इत्यमुना उभयदेशयोः मध्ये वर्धमानस्य सामरिक-आर्थिक-सहयोगस्य तथा च प्रगाढ-सम्बन्धस्य विशेषरूपेण उल्लेखो विहितः।

---------------------------------------------------

<u>आईएनएस-महेन्द्रगिरिः-</u>

रक्षा-मन्त्री राजनाथसिंहः अद्य प्रावोचत् यत्, भारतं पारम्परिक-रक्षा-क्षमतां सहैव आधुनिक-प्रौद्योगिकीं सुदृढीकृत्य एकां बलशालिनीं, आत्मनिर्भरां, रक्षा-सेनां निर्माति। तेन प्रतिपादितं यत्, आगामि-युद्धेषु कृत्रिम-बुद्धिमत्तायाः एवमेव अन्येषां नवीनतन्त्राणां प्रयोगः भवितुमर्हति । परञ्च अन्तिमरूपेण विजयः राष्ट्रिय-सङ्कल्पेन, वीर-सैनिकैः, सक्षम-सैन्य-शक्त्या एव प्राप्स्यते। रक्षामन्त्रिणा प्रोदीरितं यत्, प्रौद्योगिकी पारम्परिक-सैन्य-बलं च परस्परं पूरकौ स्तः, सहैव भारतं आत्मनिर्भर-भारत-सङ्कल्पस्यान्तर्गतं द्वयोः अपि क्षेत्रयोः उत्कृष्टं प्रदर्शनं विधातुं कटिबद्धं वर्तते। श्रीराजनाथसिंहः अद्य विशाखापत्तनम्-नगरे स्वदेशीयायाः प्रोजेक्ट 17-ए प्रणाल्याः षष्ठस्य आईएनएस महेन्द्रगिरि नामकस्य स्टेल्थ फ्रिगेट-युद्धपोतस्य नौसेनायाः पूर्वीय-पोत-दले सम्मेलन-समारोहं सम्बोधयन् आसीत्।तेन कथितं यत्, एतस्य सम्मेलनं भारतस्य सामुद्रिक-शक्तेः स्वदेशी-रक्षा-क्षमतायाः विकासार्थञ्च कश्चन अभिनवः कीर्तिस्तम्भः भविष्यति।

---------------------------------------------------

<u>ब्रिक्स सम्मेलन-नागपुर</u>

केन्द्रीय-मार्ग-परिवहन-अथ-राजमार्ग-मन्त्री नितिनगड़करी अद्य महाराष्ट्रस्य नागपुर-नगरे तृतीय 'ब्रिक्स परिवहन-मन्त्रिणां परिषदः अध्यक्षतां विहितवान्। सम्मेलनस्यास्य समाप्त्यन्तरं वार्ताहरैः सह भाषमाणः असौ अब्रवीत् यत् बहुभ्य: देशेभ्यः समागतैः प्रतिनिधिभिः वैकल्पिक-जैव-इन्धनानां अथ प्रदूषण-मुक्त-प्रौद्योगिकीनाम् उपयोगेन भूमार्ग-रेलमार्ग-विमानयान-जलमार्गेषु च 'कार्बन-तटस्थ-परिवहनं विकसितुं कृतानां प्रयासानां विस्तारेण समीक्षा कृता।

असौ प्रत्यपादयत् यत् ब्रिक्स-सदस्य-देशानां मध्ये सङ्कट-प्रतिरोधकाय, सुस्थिराय च परिवहन-क्षेत्राय परस्पर-सहयोगं सुदृढं विधातुं आधुनिक-प्रौद्योगिकीनां नूतन-अन्वेषणानां च आदान-प्रदानं क्रियते। मन्त्रिणा अग्रे सविशेषं सबलं च प्रोदीरितं यत् अस्मिन् सम्मेलने ब्रिक्स-देशानां पारस्परिक-सहयोगं नूतन-ऊर्जां प्रदातुं ऐतिहासिकः ब्रिक्स-मन्त्री-घोषणापत्रं अपि सर्वसम्मत्या अङ्गीकृतम्।

-----------------------------------------------------

<u>बावी-चक्रवातः-</u>

अद्य बावी-चक्रवातः पूर्व-चीन-सागरे प्रचण्ड-वेगेन प्रवर्धमानः सन् जपानस्य दक्षिणेषु द्वीपेषु तीव्र-वायुना सह अतिवृष्टिम् अजनयत् ।

अनेन सहैव तैवान-देशः पूर्वीय-चीनदेशश्च चक्रवातस्य तट-सङ्घट्टनाय पूर्णतः सज्जौ वर्तेते। ऋतु-विभागस्य पूर्वानुमानानुगुणं एषः चक्रवातः तैवान-देशस्य उत्तर-भागात् श्वः प्रातः एव चीन-देशस्य 'झेजियाङ्ग' प्रान्ते तटं प्रवेक्ष्यति।

जपान-देशस्य 'ओकिनावा' प्रान्ते समुद्र-तरङ्गाणां समाह्वानानन्तरं द्विशततोप्यधिकाः विमानयानानि निरस्तीकृतानि। अपरतः तैवान-देशे शैक्षणिक-संस्थाः सर्वकारीय-कार्यालयश्च स्थगिताः सन्ति। प्रान्तीय-प्रशासनेन संसूचितं यत् चक्रवात-कारणात् न्यूनातिन्यूनं षड्त्रिंशत् जनाः क्षिप्तविक्षिप्ताः सञ्जाताः, चतुर्दश-सहस्रतोप्यधिकाः अधिकाः निवासिनः सुरक्षितेषु स्थानेषु स्थानान्तरिताः । एतन्मध्ये, चीन-प्रशासनेन चक्रवातमुद्दिश्य 'ऑरेंज-अलर्ट' इति नारङ्गवर्णीया संचेतना सहैव भीषणवृष्टिमुद्दिश्य 'रेड-अलर्ट' रक्तवर्णीया संचेतना प्रसारिता।

-----------------------------------------------------

<u>भारत-इङ्ग्लैण्ड-क्रिकेट</u>

अद्य भारत-इङ्ग्लैण्ड-क्रिकेट-दलयोः मध्ये प्रचलन्त्याः शृङ्खलायाः पञ्चमः अन्तिमश्च टी-२० अन्ताराष्ट्रिय-स्पर्धा साउथेम्पटन-नगरस्य 'यूटिलिटा बाउल' क्रीडाङ्गणे भविता। एषा क्रीडा भारतीय-समयानुसारं सायङ्काले सप्तवादने समारप्स्यते।

।। इति वार्ता: ।।